# ॥ अद्वयतारक ॥

# || advayatāraka ||

## Informazioni:

Titolo: Advayataraka (Vedanta)
Nome file: advayataraka_vedanta
Categoria: Vedanta
Locazione: http://www.culturavedica.org
Autore: Tradizione vedica
Linguaggio: Sanscrito
Soggetto: Filosofia/Religione/Induismo
Translitterazione: http://www.culturavedica.org
Correzione: http://www.culturavedica.org
Descrizione: Vedanta
Ultima revisione: 10 maggio 2018
Accesso: http://www.culturavedica.org/pdf/advayataraka_vedanta
Mail: info@culturavedica.org
Font: Sanskrit 2003
Testo editabile disponibile: info@culturavedica.org

**© Quest'opera è stata digitalizzata e messa a disposizione da "CulturaVedica", può essere usata per la ricerca e lo studio personale. Non può essere usata (senza permesso) per scopo promozionale o commerciale.**

Aiutate a mantenere il rispetto e lo spirito del sito.

# ॥ अद्वयतारक ॥

॥ श्रीः ॥
उपनिषद्ब्रह्मयोगिविरचितं विवरणम्
श्रीमदप्पयशिवाचार्यविरचितभाष्योपेता

Invocazione
ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः

व्याख्येयो विषयः तदधिकारी च
अथातोऽद्वयतारकोपनिषदं व्याख्यास्यामः ।
यतये जितेन्द्रियाय शमादिषड्गुणपूर्णाय ॥१॥
योगोपाय तत्फलम्
चित्स्वरूपोऽहमिति सदा भवयन् सम्यङ्निमीलिताक्षः
किञ्चिदुन्मीलिताक्षो वाऽन्तर्दृष्ट्या भ्रूदहरादुपरि
सच्चिदानन्दतेजःकूटरूपं परं ब्रह्मावलोकयन् तद्रूपो
भवति ॥२॥
अद्वयतारकपदार्थौ
गर्भजन्मजरामरणभयात्संतारयति तस्मात्तारकमिति ।
जीवेश्वरौ मायिकाविति विज्ञाय सर्वविशेषं नेति नेतीति
विहाय यदवशिष्यते तदद्वयं ब्रह्म ॥३॥
लक्ष्यत्रयानुसन्धानविधिः
तत्सिद्ध्यै लक्ष्यत्रयानुसंधानं कर्तव्यं ॥४॥
अन्तर्लक्ष्यलक्षणम्
देहमध्ये ब्रह्मनाडी सुषुम्ना सूर्यरूपिणी पूर्णचन्द्राभा वर्तते ।
सा तु मूलाधारादारभ्य ब्रह्मरन्ध्रगामिनी भवति ।
तन्मध्ये तटित्कोटिसमानकान्त्या मृणालसूत्रवत् सुक्ष्माङ्गी
कुण्ण्दलिनीति प्रसिद्धाऽस्ति ।
तां दृष्ट्वा मनसैव नरः सर्वपापविनाशद्वारा मुक्तो भवति ।
फालोर्ध्वगललाटविशेषमण्डले निरन्तरं
तेजस्तारकयोगविस्फुरणेन पश्यति चेत् सिद्धो भवति ।
तर्जन्यग्रोन्मीलितकर्णरन्ध्रद्वये तत्र फूत्कारशब्दो जायते ।
तत्र स्थिते मनसि चक्षुर्मध्यगतनीलज्योतिस्स्थलं विलोक्य
अन्तर्दृष्ट्या निरतिशयसुखं प्राप्नोति ।
एवं हृदये पश्यति ।
एवमन्तर्लक्ष्यलक्षणं मुमुक्षुभिरुपास्यं ॥५॥
बहिर्लक्ष्यलक्षणम् अथ बहिर्लक्ष्यलक्षणं ।
नासिकाग्रे चतुर्भिः षड्भिरष्टभिःदशभिः
द्वादशभिः क्रमात् अङ्गुलालन्ते
नीलद्युतिश्यामत्वसदृग्रक्तभङ्गीस्फुरत्पीतवर्णद्वयोपेतंव्योमयदि
पश्यति स तु योगी भवति ।
चलदृष्ट्या व्योमभागवीक्षितुःपुरुषस्य
दृष्ट्यग्रे ज्योतिर्मयूखा वर्तते ।
तद्दर्शनेन योगी भवति ।
तप्तकाञ्चनसङ्काशज्योतिर्मयूखा अपाङ्गान्ते भूमौ वा
पश्यतितद्दृष्टिः स्थिरा भवति ।
शिर्षोपरि द्वादशाङ्गुलसमीक्षितुःअमृतत्वं भवति ।
यत्र कुत्र स्थितस्य शिरसि व्योमज्योतिर्दृष्टंचेत्
स तु योगी भवति ॥६॥
मध्यलक्ष्यलक्षणम् अथ मध्यलक्ष्यलक्षणं
प्रातश्चित्रादिवर्णाखण्डसूर्यचक्रवत् वह्निज्वालावलीवत्
तद्विहीनान्तरिक्षवत् पश्यति ।
तदाकाराकारितया अवतिष्ठति ।

# || advayatāraka ||

|| śrīḥ ||
upaniṣadbrahmayogiviracitaṃ vivaraṇam
śrīmadappayaśivācāryaviracitabhāṣyopetā

Invocazione
oṁ pūrṇamadaḥ pūrṇamidaṃ pūrṇāt pūrṇamudacyate |
pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate ||
oṁ śāntiḥ śāntiḥ śāntiḥ |

vyākhyeyo viṣayaḥ tadadhikārī ca
athāto:dvayatārakopaniṣadaṃ vyākhyāsyāmaḥ |
yataye jitendriyāya śamādiṣaḍguṇapūrṇāya ||1||
yogopāya tatphalam
citsvarūpo:hamiti sadā bhavayan samyaṅnimīlitākṣaḥ
kiñcidunmīlitākṣo vā:ntardṛṣṭyā bhrūdaharādupari
saccidānandatejaḥkūṭarūpaṃ paraṃ brahmāvalokayan tadrūpo
bhavati ||2||
advayatārakapadārthau
garbhajanmajarāmaraṇabhayātsaṃtārayati tasmāttārakamiti |
jīveśvarau māyikāviti vijñāya sarvaviśeṣaṃ neti netīti
vihāya yadavaśiṣyate tatadvayaṃ brahma ||3||
lakṣyatrayānusandhānavidhiḥ
tatsiddhyai lakṣyatrayānusaṃdhānaṃ kartavyaṃ ||4||
antarlakṣyalakṣaṇam
dehamadhye brahmanāḍī suṣumnā sūryarūpiṇī pūrṇacandrābhā vartate |
sā tu mūlādhārādārabhya brahmarandhragāminī bhavati |
tanmadhye taṭitkoṭisamānakāntyā mṛṇālasūtravat sukṣmāṅgī
kuṇṇdalinīti prasiddhā:sti |
tāṃ dṛṣṭvā manasaiva naraḥ sarvapāpavināśadvārā mukto bhavati |
phālordhvagalalāṭaviśeṣamaṇḍale nirantaraṃ
tejastārakayogavisphuraṇena paśyati cet siddho bhavati |
tarjanyagronmīlitakarṇarandhradvaye tatra phūtkāraśabdo jāyate |
tatra sthite manasi cakṣurmadhyagatanīlajyotissthalaṃ vilokya
antardṛṣṭyā niratiśayasukhaṃ prāpnoti |
evaṃ hṛdaye paśyati |
evamantarlakṣyalakṣaṇaṃ mumukṣubhirupāsyaṃ ||5||
bahirlakṣyalakṣaṇam atha bahirlakṣyalakṣaṇaṃ |
nāsikāgre caturbhiḥ ṣaḍbhiraṣṭabhiḥdaśabhiḥ
dvādaśabhiḥ kramāt aṅgulālante
nīladyutiśyāmatvasadṛgraktabhaṅgīsphuratpītavarṇadvayopetaṃvyomayadi
paśyati sa tu yogī bhavati |
caladṛṣṭyā vyomabhāgavīkṣituḥpuruṣasya
dṛṣṭyagre jyotirmayūkhā vartate |
taddarśanena yogī bhavati |
taptakāñcanasaṅkāśajyotirmayūkhā apāṅgānte bhūmau vā
paśyatitaddṛṣṭiḥ sthirā bhavati |
śirṣopari dvādaśāṅgulasamīkṣituḥamṛtatvaṃ bhavati |
yatra kutra sthitasya śirasi vyomajyotirdṛṣṭaṃcet
sa tu yogī bhavati ||6||
madhyalakṣyalakṣaṇam atha madhyalakṣyalakṣaṇaṃ
prātaścitrādivarṇākhaṇḍasūryacakravat vahnijvālāvalīvat
tadvihīnāntarikṣavat paśyati |
tadākārākāritayā avatiṣṭhati |

तद्भूयोदर्शनेन गुणरहिताकाशं भवति ।
विस्फुरत्तारकाकारदीप्यमानगाढतमोपमं परमाकाशं
भवति ।कालानलसमद्योतमानंमहाकाशं भवति ।
सर्वोत्कृष्टपरमद्युतिप्रद्योतमानं तत्त्वाकाशं भवति ।
कोटिसूर्यप्रकाशवैभवसङ्काशं सूर्याकशं भवति ।
एवं बाह्याभ्यन्तरस्थव्योमपञ्चकं तारकलक्ष्यं ।
तद्दर्शी विमुक्तफलस्तादृग्व्योमसमानो भवति ।
तस्मात्तारक एव लक्ष्यममनस्कफलप्रदं भवति ॥७॥
द्विविधं तारकम्
तत्तारकं द्विविधं पूर्वार्धं तारकमुत्तरार्धममनस्कं चेति ।
तदेष श्लोको भवेति तद्योगं च द्विधा विद्धि पूर्वोत्तरविधानतः ।
पूर्वं तु तारकं विद्यात् अमनस्कं तदुत्तरमिति ॥८॥
तारकयोगसिद्धिः तारकयोगस्य सोमसृयैक्यदर्शनैकफलकत्वं ।
अक्ष्यन्तस्तारयोः चन्द्रसूर्यप्रतिफलनं भवति ।
तारकाभ्यांसूर्यचन्द्रमण्डलदर्शनं ब्रह्माण्डमिव
पिण्डाण्डशिरोमध्यस्थाकाशे रवीन्दुमण्डलद्वितयमस्तीति
निश्चित्य तारकाभ्यां तद्दर्शनं ।
अत्राप्युभयैक्यदृष्ट्या मनोयुक्तं
ध्यायेत् तद्योगाभावे इन्द्रयप्रवृत्तेरनवकाशात् ।
तस्मातन्तर्दृष्ट्या तारक एवानुसंधेयः ॥९॥
मूर्तामूर्तभेदेन द्विविधमनुसन्धेयम्
तारकं द्विविधं मूर्तितारकं अमूर्तितारकं चेति ।
यतिन्द्रियान्तं तत् मूर्तिमत्
। यत् भ्रूयुगातीतं तत् अमूर्तिमत् ।
सर्वत्र अन्तःपदार्थविवेचने मनोयुक्ताभ्यास इष्यते ।
तारकाभ्यंतदूर्ध्वस्थसत्त्वदर्शनात् मनोयुक्तेन अन्तरीक्षणेन
सच्चिदानन्दस्वरूपं ब्रह्मैव ।
तस्मात् शुक्लतेजोमयं ब्रह्मेति सिद्धं ।
तद्ब्रह्म मनःसहकारिचक्षुषा अन्तर्दृष्ट्या वेद्यं भवति ।
एवममूर्तितारकमपि ।
मनोयुक्तेन चक्षुषैव दहरादिकं वेद्यं
भवति रूपग्रहणप्रयोचनस्य मनश्चक्षुरधीनत्वात्
बाह्यवदान्तरेऽपि आत्ममनश्चक्षुःसंयोगेनैव
रूपग्रहणकार्योदयात् ।
तस्मान्मनोयुक्ता अन्तर्दृष्टिः तारकप्रकाशाय भवति ॥१०॥
तारकयोगस्वरूपं भ्रूयुगमध्यबिले दृष्टिं
तद्द्वारा ऊर्ध्वस्थिततेज आविर्भूतं
तारकयोगो भवति । तेन सह मनोयुक्तं तारकं सुसंयोज्य
प्रयत्नेनभ्रूयुग्मं सावधानतया किञ्चिदूर्ध्वम्त्क्षेपयेत् ।
इति पूर्वतारकयोगः ।
उत्तरं तु अमूर्तिमतमनस्कमित्युच्यते ।
तालुमूलोर्ध्वभागे महान् ज्योतिर्मयूखो वर्तते ।
तत् योगिभिर्ध्येयं ।
तस्मातणिमादिसिद्धिर्भवति ॥११॥
शाम्भवीमुद्रा अन्तर्बाह्यलक्ष्ये दृष्टौ
निमेषोन्मेषवर्जितायां सत्यं सांभवी मुद्रा भवति ।
तन्मुद्रारूढज्ञानिनिवासात् भूमिः पवित्रा भवति ।
तद्दृष्ट्या सर्वे लोकाः पवित्रा भवन्ति ।
तादृशपरमयोगिपूजा यस्य लभ्यते सोऽपि मुक्तो भवति ॥१२॥
अन्तर्लक्ष्यविकल्पाः अन्तर्लक्ष्यज्वलज्ज्योतिःस्वरूपं भवति ।
परमगुरूपदेशेन सहस्रारज्वलज्ज्योतिर्वा
बुद्धिगुहानिहितचिज्ज्योतिर्वा
षोडशान्तस्थतुरीयचैतन्यं वा अन्तर्लक्ष्यं भवति ।
तद्दर्शनं सदाचार्यमूलं ॥१३॥
आचार्यलक्षणम् आचार्यो वेदसम्पन्नो विष्णुभक्तो विमत्सरः ।
योगज्ञो योगनिष्ठश्च सदा योगात्मकः शुचिः ॥१४॥

tadbhūyodarśanena guṇarahitākāśaṃ bhavati |
visphurattārakākāradīpyamānagāḍhatamopamaṃ paramākāśaṃ
bhavati |kālānalasamadyotamānaṃmahākāśaṃ bhavati |
sarvotkṛṣṭaparamadyutipradyotamānaṃ tattvākāśaṃ bhavati |
koṭisūryaprakāśavaibhavasaṅkāśaṃ sūryākaśaṃ bhavati |
evaṃ bāhyābhyantarasthavyomapañcakaṃ tārakalakṣyaṃ |
taddarśī vimuktaphalastādṛgvyomasamāno bhavati |
tasmāttāraka eva lakṣyamamanaskaphalapradaṃ bhavati ||7||
dvividhaṃ tārakam
tattārakaṃ dvividhaṃ pūrvārdhaṃ tārakamuttarārdhamamanaskaṃ ceti |
tadeṣa śloko bhaveti tadyogaṃ ca dvidhā viddhi pūrvottaravidhānataḥ |
pūrvaṃ tu tārakaṃ vidyāt amanaskaṃ taduttaramiti ||8||
tārakayogasiddhiḥ tārakayogasya somasṛryaikyadarśanaikaphalakatvaṃ |
akṣyantastārayoḥ candrasūryapratiphalanaṃ bhavati |
tārakābhyāṃsūryacandramaṇḍaladarśanaṃ brahmāṇḍamiva
piṇḍāṇḍaśiromadhyasthākāśe ravīndumaṇḍaladvitayamastīti
niścitya tārakābhyāṃ taddarśanaṃ |
atrāpyubhayaikyadṛṣṭyā manoyuktaṃ
dhyāyet tadyogābhāve indrayapravṛtteranavakāśāt |
tasmātantardṛṣṭyā tāraka evānusaṃdheyaḥ ||9||
mūrtāmūrtabhedena dvividhamanusandheyam
tārakaṃ dvividhaṃ mūrtitārakaṃ amūrtitārakaṃ ceti |
yatindriyāntaṃ tat mūrtimat |
yat bhrūyugātītaṃ tat amūrtimat |
sarvatra antaḥpadārthavivecane manoyuktābhyāsa iṣyate |
tārakābhyaṃtadūrdhvasthasattvadarśanāt manoyuktena antarīkṣaṇena
saccidānandasvarūpaṃ brahmaiva |
tasmāt śuklatejomayaṃ brahmeti siddhaṃ |
tadbrahma manaḥsahakāricakṣuṣā antardṛṣṭyā vedyaṃ bhavati |
evamamūrtitārakamapi |
manoyuktena cakṣuṣaiva daharādikaṃ vedyaṃ
bhavati rūpagrahaṇaprayocanasya manaścakṣuradhīnatvāt
bāhyavadāntare:pi ātmamanaścakṣuḥsaṃyogenaiva
rūpagrahaṇakāryodayāt |
tasmānmanoyuktā antardṛṣṭiḥ tārakaprakāśāya bhavati ||10||
tārakayogasvarūpaṃ bhrūyugamadhyabile dṛṣṭiṃ
taddvārā ūrdhvasthitateja āvirbhūtaṃ
tārakayogo bhavati | tena saha manoyuktaṃ tārakaṃ susaṃyojya
prayatnenabhrūyugmaṃ sāvadhānatayā kiñcidūrdhvamtkṣepayet |
iti pūrvatārakayogaḥ |
uttaraṃ tu amūrtimatamanaskamityucyate |
tālumūlordhvabhāge mahān jyotirmayūkho vartate |
tat yogibhirdhyeyaṃ |
tasmātaṇimādisiddhirbhavati ||11||
śāmbhavīmudrā antarbāhyalakṣye dṛṣṭau
nimeṣonmeṣavarjitāyāṃ satyaṃ sāṃbhavī mudrā bhavati |
tanmudrārūḍhajñāninivāsāt bhūmiḥ pavitrā bhavati |
taddṛṣṭyā sarve lokāḥ pavitrā bhavanti |
tādṛśaparamayogipūjā yasya labhyate so:pi mukto bhavati ||12||
antarlakṣyavikalpāḥ antarlakṣyajvalajjyotiḥsvarūpaṃ bhavati |
paramagurūpadeśena sahasrārajvalajjyotirvā
buddhiguhānihitacijjyotirvā
ṣoḍaśāntasthaturīyacaitanyaṃ vā antarlakṣyaṃ bhavati |
taddarśanaṃ sadācāryamūlaṃ ||13||
ācāryalakṣaṇam ācāryo vedasampanno viṣṇubhakto vimatsaraḥ |
yogajño yoganiṣṭhaśca sadā yogātmakaḥ śuciḥ ||14||

गुरुभक्तिसमायुक्तः पुरुष्ज्ञो विशेषतः ।
एवं लक्षणसम्पन्नो गुरुरित्यभिधीयते ॥१५॥
गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निरोधकः ।
अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते ॥१६॥
परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परायणं ॥१७॥
गुरुरेव परा काष्ठा गुरुरेव परं धनं ।
यस्मात्तदुपदेष्टाऽसौ तस्माद्गुरुतरो गुरुरिति ॥१८॥
ग्रन्थाभ्यासफलम् यः सकृदुच्चारयति
तस्य संसारमोचनं भवति ।
सर्वजन्मकृतं पापं तत्क्षणादेव नश्यति ।
सर्वान् कामानवाप्नोति ।
सर्वपुरुषार्थसिद्धिर्भवति ।
य एवं वेदेत्युपनिषत् ॥१९॥

gurubhaktisamāyuktaḥ puruṣjño viśeṣataḥ |
evaṃ lakṣaṇasampanno gururityabhidhīyate ||15||
guśabdastvandhakāraḥ syāt ruśabdastannirodhakaḥ |
andhakāranirodhitvāt gururityabhidhīyate ||16||
paraṃ brahma gurureva parā gatiḥ |
gurureva parā vidyā gurureva parāyaṇaṃ ||17||
gurureva parā kāṣṭhā gurureva paraṃ dhanaṃ |
yasmāttadupadeṣṭā:'sau tasmādgurutaro gururiti ||18||
granthābhyāsaphalam yaḥ sakṛduccārayati
tasya saṃsāramocanaṃ bhavati |
sarvajanmakṛtaṃ pāpaṃ tatkṣaṇādeva naśyati |
sarvān kāmānavāpnoti |
sarvapuruṣārthasiddhirbhavati |
ya evaṃ vedetyupaniṣat ||19||

CULTURA VEDICA